॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ११

विमानात्तु सुसङ्क्रम्य प्राकारं हरियूथपः ।
हनूमान्वेगवानासीद्यथा विद्युद्घनान्तरे ॥१॥

सम्परिक्रम्य हनुमान्रावणस्य निवेशनान् ।
अदृष्ट्वा जानकीं सीतामब्रवीद्वचनं कपिः ॥२॥

भूयिष्ठं लोडिता लङ्का रामस्य चरता प्रियम् ।
न हि पश्यामि वैदेहीं सीतां सर्वाङ्गशोभनाम् ॥३॥

पल्वलानि तटाकानि सरांसि सरितस्तथा ।
नद्योऽनूपवनान्ताश्च दुर्गाश्च धरणीधराः ।
लोडिता वसुधा सर्वा न च पश्यामि जानकीम् ॥४॥

इह सम्पातिना सीता रावणस्य निवेशने ।
आख्याता गृध्रराजेन न च पश्यामि ताम् अहम् ॥५॥

किं नु सीताथ वैदेही मैथिली जनकात्मजा ।
उपतिष्ठेत विवशा रावणं दुष्टचारिणम् ॥६॥

क्षिप्रमुत्पततो मन्ये सीतामादाय रक्षसः ।
बिभ्यतो रामबाणानामन्तरा पतिता भवेत् ॥७॥

अथ वा ह्रियमाणायाः पथि सिद्धनिषेविते ।
मन्ये पतितमार्यायाः हृदयं प्रेक्ष्य सागरम् ॥८॥

रावणस्योरुवेगेन भुजाभ्यां पीडितेन च ।
तया मन्ये विशालाक्ष्या त्यक्तं जीवितमार्यया ॥९॥

उपर्युपरि वा नूनं सागरं क्रमतस्तदा ।
विवेष्टमाना पतिता समुद्रे जनकात्मजा ॥१०॥

आहो क्षुद्रेण चानेन रक्षन्ती शीलमात्मनः ।
अबन्धुर्भक्षिता सीता रावणेन तपस्विनी ॥११॥

अथ वा राक्षसेन्द्रस्य पत्नीभिरसितेक्षणा ।
अदुष्टा दुष्टभावाभिर्भक्षिता सा भविष्यति ॥१२॥

सम्पूर्णचन्द्रप्रतिमं पद्मपत्रनिभेक्षणम् ।
रामस्य ध्यायती वक्त्रं पञ्चत्वं कृपणा गता ॥१३॥

हा राम लक्ष्मणेत्येव हायोध्येति च मैथिली ।
विलप्य बहु वैदेही न्यस्तदेहा भविष्यति ॥१४॥

अथ वा निहिता मन्ये रावणस्य निवेशने ।
नूनं लालप्यते मन्दं पञ्जरस्थेव शारिका ॥१५॥

जनकस्य कुले जाता रामपत्नी सुमध्यमा ।
कथमुत्पलपत्राक्षी रावणस्य वशं व्रजेत् ॥१६॥

विनष्टा वा प्रनष्टा वा मृता वा जनकात्मजा ।
रामस्य प्रियभार्यस्य न निवेदयितुं क्षमम् ॥१७॥

निवेद्यमाने दोषः स्याद्दोषः स्यादनिवेदने ।
कथं नु खलु कर्तव्यं विषमं प्रतिभाति मे ॥१८॥

अस्मिन्नेवङ्गते कर्ये प्राप्तकालं क्षमं च किम् ।
भवेदिति मतिं भूयो हनुमान्प्रविचारयन् ॥१९॥

यदि सीतामदृष्ट्वाहं वानरेन्द्रपुरीमितः ।
गमिष्यामि ततः को मे पुरुषार्थो भविष्यति ॥२०॥

ममेदं लङ्घनं व्यर्थं सागरस्य भविष्यति ।
प्रवेशश्चिव लङ्काया राक्षसानां च दर्शनम् ॥२१॥

किं वा वक्ष्यति सुग्रीवो हरयो व समागताः ।
किष्किन्धां समनुप्राप्तौ तौ वा दशरथात्मजौ ॥२२॥

गत्वा तु यदि काकुत्स्थं वक्ष्यामि परमप्रियम् ।
न दृष्टेति मया सीता ततस्त्यक्ष्यन्ति जीवितम् ॥२३॥

परुषं दारुणं क्रूरं तीक्ष्णमिन्द्रियतापनम् ।
सीतानिमित्तं दुर्वाक्यं श्रुत्वा स न भविष्यति ॥२४॥

तं तु कृच्छ्रगतं दृष्ट्वा पञ्चत्वगतमानसं ।
भृशानुरक्तो मेधावी न भविष्यति लक्ष्मणः ॥२५॥

विनष्टौ भ्रातरौ श्रुत्वा भरतोऽपि मरिष्यति ।

भरतं च मृतं दृष्ट्वा शत्रुघ्नो न भविष्यति ॥ २६ ॥

पुत्रान्मृतान्समीक्ष्याथ न भविष्यन्ति मातरः ।
कौसल्या च सुमित्रा च कैकेयी च न संशयः ॥ २७ ॥

कृतज्ञः सत्यसन्धश्च सुग्रीवः प्लवगाधिपः ।
रामं तथा गतं दृष्ट्वा ततस्त्यक्ष्यन्ति जीवितम् ॥ २८ ॥

दुर्मना व्यथिता दीना निरानन्दा तपस्विनी ।
पीडिता भर्तृशोकेन रुमा त्यक्ष्यति जीवितम् ॥ २९ ॥

वालिजेन तु दुःखेन पीडिता शोककर्शिता ।
पञ्चत्वगमने राज्ञस्तारापि न भविष्यति ॥ ३० ॥

मातापित्रोर्विनाशेन सुग्रीव व्यसनेन च ।
कुमारोऽप्यङ्गदः कस्माद्धारयिष्यति जीवितम् ॥ ३१ ॥

भर्तृजेन तु शोकेन अभिभूता वनौकसः ।
शिरांस्यभिहनिष्यन्ति तलैर्मुष्टिभिरेव च ॥ ३२ ॥

सान्त्वेनानुप्रदानेन मानेन च यशस्विना ।
लालिताः कपिराजेन प्राणांस्त्यक्ष्यन्ति वानराः ॥ ३३ ॥

न वनेषु न शैलेषु न निरोधेषु वा पुनः ।
क्रीडामनुभविष्यन्ति समेत्य कपिकुञ्जराः ॥ ३४ ॥

सपुत्रदाराः सामात्या भर्तृव्यसनपीडिताः ।
शैलाग्रेभ्यः पतिष्यन्ति समेत्य विषमेषु च ॥ ३५ ॥

विषमुद्बन्धनं वापि प्रवेशं ज्वलनस्य वा ।
उपवासमथो शस्त्रं प्रचरिष्यन्ति वानराः ॥ ३६ ॥

घोरमारोदनं मन्ये गते मयि भविष्यति ।
इक्ष्वाकुकुलनाशश्च नाशश्चैव वनौकसाम् ॥ ३७ ॥

सोऽहं नैव गमिष्यामि किष्किन्धां नगरीमितः ।
न हि शक्ष्याम्यहं द्रष्टुं सुग्रीवं मैथिलीं विना ॥ ३८ ॥

मय्यगच्छति चेहस्थे धर्मात्मानौ महारथौ ।
आशया तौ धरिष्येते वनराश्च मनस्विनः ॥ ३९ ॥

हस्तादानो मुखादानो नियतो वृक्षमूलिकः ।
वानप्रस्थो भविष्यामि अदृष्ट्वा जनकात्मजाम् ॥ ४० ॥

सागरानूपजे देशे बहुमूलफलोदके ।
चितां कृत्वा प्रवेक्ष्यामि समिद्धमरणीसुतम् ॥ ४१ ॥

उपविष्टस्य वा सम्यग्लिङ्गिनं साधयिष्यतः ।
शरीरं भक्षयिष्यन्ति वायसाः श्वापदानि च ॥ ४२ ॥

इदमप्यृषिभिर्दृष्टं निर्याणमिति मे मतिः ।
सम्यगापः प्रवेक्ष्यामि न चेत्पश्यामि जानकीम् ॥ ४३ ॥

सुजातमूला सुभगा कीर्तिमालायशस्विनी ।
प्रभग्ना चिररात्रीयं मम सीतामपश्यतः ॥ ४४ ॥

तापसो वा भविष्यामि नियतो वृक्षमूलिकः ।
नेतः प्रतिगमिष्यामि तामदृष्ट्वासितेक्षणाम् ॥ ४५ ॥

यदीतः प्रतिगच्छामि सीतामनधिगम्य ताम् ।
अङ्गदः सहितैः सर्वैर्वानरैर्न भविष्यति ॥ ४६ ॥

विनाशे बहवो दोषा जीवन्प्राप्नोति भद्रकम् ।
तस्मात्प्राणान्धरिष्यामि ध्रुवो जीवति सङ्गमः ॥ ४७ ॥

एवं बहुविधं दुःखं मनसा धारयन्मुहुः ।
नाध्यगच्छत्तदा पारं शोकस्य कपिकुञ्जरः ॥ ४८ ॥

रावणं वा वधिष्यामि दशग्रीवं महाबलम् ।
काममस्तु हृता सीता प्रत्याचीर्णं भविष्यति ॥ ४९ ॥

अथवैनं समुत्क्षिप्य उपर्युपरि सागरम् ।
रामायोपहरिष्यामि पशुं पशुपतेरिव ॥ ५० ॥

इति चिन्ता समापन्नः सीतामनधिगम्य ताम् ।
ध्यानशोका परीतात्मा चिन्तयामास वानरः ॥ ५१ ॥

यावत्सीतां न पश्यामि रामपत्नीं यशस्विनीम् ।
तावदेतां पुरीं लङ्कां विचिनोमि पुनः पुनः ॥ ५२ ॥

सम्पाति वचनाच्चापि रामं यद्यानयाम्यहम् ।
अपश्यन्नाघवो भार्यां निर्दहेत्सर्ववानरान् ॥ ५३ ॥

इहैव नियताहारो वत्स्यामि नियतेन्द्रियः ।
न मत्कृते विनश्येयुः सर्वे ते नरवानराः ॥ ५४ ॥

अशोकवनिका चापि महतीयं महाद्रुमा ।
इमामभिगमिष्यामि न हीयं विचिता मया ॥ ५५ ॥

वसून्रुद्रांस्तथादित्यानश्विनौ मरुतोऽपि च ।

नमस्कृत्वा गमिष्यामि रक्षसां शोकवर्धनः ॥ ५६ ॥

जित्वा तु राक्षसान्देवीमिक्ष्वाकुकुलनन्दिनीम् ।
सम्प्रदास्यामि रामाया यथासिद्धिं तपस्विने ॥ ५७ ॥

स मुहूर्तमिव ध्यात्वा चिन्ताविग्रथितेन्द्रियः ।
उदतिष्ठन्महाबाहुर्हनूमान्मारुतात्मजः ॥ ५८ ॥

नमोऽस्तु रामाय सलक्ष्मणाय
देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो
नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः ॥ ५९ ॥

स तेभ्यस्तु नमस्कृत्वा सुग्रीवाय च मारुतिः ।
दिशः सर्वाः समालोक्य अशोकवनिकां प्रति ॥ ६० ॥

स गत्वा मनसा पूर्वमशोकवनिकां शुभाम् ।
उत्तरं चिन्तयामास वानरो मारुतात्मजः ॥ ६१ ॥

ध्रुवं तु रक्षोबहुला भविष्यति वनाकुला ।
अशोकवनिका चिन्त्या सर्वसंस्कारसंस्कृता ॥ ६२ ॥

रक्षिणश्चात्र विहिता नूनं रक्षन्ति पादपान् ।
भगवानपि सर्वात्मा नातिक्षोभं प्रवायति ॥ ६३ ॥

सङ्क्षिप्तोऽयं मयात्मा च रामार्थे रावणस्य च ।
सिद्धिं मे संविधास्यन्ति देवाः सर्षिगणास्त्विह ॥ ६४ ॥

ब्रह्मा स्वयम्भूर्भगवान्देवाश्चैव दिशन्तु मे ।
सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रधृत् ॥ ६५ ॥

वरुणः पाशहस्तश्च सोमादित्यौ तथैव च ।
अश्विनौ च महात्मानौ मरुतः सर्व एव च ॥ ६६ ॥

सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः ।
दास्यन्ति मम ये चान्ये अदृष्टाः पथि गोचराः ॥ ६७ ॥

तदुन्नसं पाण्डुरदन्तमव्रणं
शुचिस्मितं पद्मपलाशलोचनम् ।
द्रक्ष्ये तदार्यावदनं कदा न्वहं
प्रसन्नताराधिपतुल्यदर्शनम् ॥ ६८ ॥

क्षुद्रेण पापेन नृशंसकर्मणा
सुदारुणालङ्कृतवेषधारिणा ।
बलाभिभूता अबला तपस्विनी
कथं नु मे दृष्टपथेऽद्य सा भवेत् ॥ ६९ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com